# Suryaryastotra

# सूर्यार्यास्तोत्रम्

## Document Information

Text title : sUryAryAstotram yAjnvalkyavirachitaM

File name : sUryAryAstotram.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Proofread by : NA, Karthik Raman

Latest update : January 9, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 9, 2020

*sanskritdocuments.org*

# सूर्यार्यास्तोत्रम्

श्री गणेशाय नमः ॥

शुकतुण्डच्छवि-सवितुश्चण्डरुचेः पुण्डरीकवनबन्धोः ।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः ॥ १॥

यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि ।
कुरुतेञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः ॥ २॥

उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय ।
अम्बरचूडामणये दिग्वनिताकर्णपूराय ॥ ३॥

जयति जनानन्दकरः करनिकरनिरस्ततिमिरसङ्घातः ।
लोकालोकालोकः कमलारुणमण्डलः सूर्यः ॥ ४॥

प्रतिबोधितकमलवनः कृतघटनश्चक्रवाकमिथुनानाम् ।
दर्शितसमस्तभुवनः परहितनिरतो रविः सदा जयति ॥ ५॥

अपनयतु सकलकलिकृतमलपटलं सप्रतप्तकनकाभः ।
अरविन्दवृन्दविघटनपटुतरकिरणोत्करः सविता ॥ ६॥

उदयाद्रिचारुचामर हरितहयखुरपरिहितरेणुराग ।
हरितहय हरितपरिकर गगनाङ्गनदीपक नमस्तेऽस्तु ॥ ७॥

उदितवति त्वयि विकसति मुकुलीयति समस्तमस्तमितबिम्बे ।
न ह्यन्यस्मिन्दिनकर सकलं कमलायते भुवनम् ॥ ८॥

जयति रविरुदयसमये बालातपः कनकसन्निभो यस्य ।
कुसुमाञ्जलिरिव जलधौ तरन्ति रथसप्तयः सप्त ॥ ९॥

आर्याः साम्बपुरे सप्त आकाशात्पतिता भुवि ।
यस्य कण्ठे गृहे वापि न स लक्ष्म्या वियुज्यते ॥ १०॥

आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा जपेत् ।

तस्य गेहं च दीपं च पद्मा सत्यं न मुञ्चति ॥ ११॥

निधिरेश दरिद्राणां रोगिणां परमौषधम् ।
सिद्धिः सकलकार्याणां गाथेयं संस्मृता रवेः ॥ १२॥

इति श्रीयाज्ञवल्क्यविरचितं सूर्यार्यास्तोत्रं सम्पूर्णम् ।

Proofread NA, Karthik Raman

*Suryaryastotra*
pdf was typeset on February 9, 2020

Please send corrections to *sanskrit@cheerful.com*